শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ষড্বিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে ষড্ৱিংশং দশকম্॥

## গজেন্দ্রমোক্ষৱর্ণনম্

ইন্দ্রদ্যুম্নঃ পাণ্ড্যখণ্ডাধিরাজ -
    স্ত্বদ্ভক্তাত্মা চন্দনাদ্রৌ কদাচিৎ।
ৎৱৎসেৱাযাং মগ্নধীরালুলোকে
    নৈৱাগস্ত্যং প্রাপ্তমাতিথ্যকামম্॥ **26.1** ॥

কুম্ভোদ্ভূতিঃ সম্ভৃতক্রোধভারঃ
    স্তব্ধাত্মা ৎৱং হস্তিভূযং ভজেতি।
শপ্ত্বাঽথৈনং প্রত্যগাৎ সোঽপি লেভে
    হস্তীন্দ্রৎৱং ৎৱৎস্মৃতিৱ্যক্তিধন্যম্॥ **26.2** ॥

দুগ্ধাম্ভোধের্মধ্যভাজি ত্রিকূটে
    ক্রীডঞ্ছৈলে যূথপোঽযং ৱশাভিঃ।
সর্ৱান্ জন্তূনত্যৱর্তিষ্ট শক্ত্যা
    ৎৱদ্ভক্তানাং কুত্র নোৎকর্ষলাভঃ॥ **26.3** ॥

স্ৱেন স্থেম্না দিৱ্যদেশৎৱশক্ত্যা
    সোঽযং খেদানপ্রজানন্ কদাচিৎ।
শৈলপ্রান্তে ঘর্মতান্তঃ সরস্যাং
    যূথৈস্সার্ধং ৎৱৎপ্রণুন্নোঽভিরেমে॥ **26.4** ॥

হূহূস্তাৱদ্ দেৱলস্যাপি শাপাৎ
    গ্রাহীভূতস্তজ্জলে ৱর্তমানঃ।

জগ্রাহৈনং হস্তিনং পাদদেশে
শান্ত্যর্থং হি শ্রান্তিদোঽসি স্বকানাম্॥ **26.5** ॥

ৎৱৎসেৱাযা ৱৈভৱাৎ দুর্নিরোধং
যুদ্ধ্যন্তং তং ৱৎসরাণাং সহস্রম্।
প্রাপ্তে কালে ৎৱৎপদৈকাগ্র্যসিদ্ধ্যৈ
নক্রাক্রান্তং হস্তিৱর্যং ৱ্যধাস্ত্ৱম্॥ **26.6** ॥

আর্তিৱ্যক্তপ্রাক্তনজ্ঞানভক্তিঃ
শুণ্ডোৎক্ষিপ্তৈঃ পুণ্ডরীকৈঃ সমর্চন্।
পূর্ৱাভ্যস্তং নির্ৱিশেষাত্মনিষ্ঠং
স্তোত্র শ্রেষ্ঠং সোঽন্ৱগাদীৎ পরাত্মন্॥ **26.7** ॥

শ্রুৎৱা স্তোত্রং নির্গুণস্থং সমস্তং
ব্রহ্মেশাদ্যৈর্নাহমিত্যপ্রযাতে।
সর্ৱাত্মা ৎৱং ভূরিকারুণ্যৱেগাৎ
তার্ক্ষ্যারূঢঃ প্রেক্ষিতোঽভূঃ পুরস্তাৎ॥ **26.8** ॥

হস্তীন্দ্রং তং হস্তপদ্মেন ধৃৎৱা
চক্রেণ ৎৱং নক্রৱর্যং ৱ্যদারীঃ।
গন্ধর্ৱেঽস্মিন্ মুক্তশাপে স হস্তী
ৎৱৎসারূপ্যং প্রাপ্য দেদীপ্যতে স্ম॥ **26.9** ॥

এতদ্বৃত্তং ৎৱাং চ মাং চ প্রগে যো
গাযেৎসোঽযং ভূযসে শ্রেযসে স্যাৎ।
ইত্যুক্ত্বৈনং তেন সার্ধং গতস্ত্ৱং
ধিষ্ণ্যং ৱিষ্ণো পাহি ৱাতালযেশ॥ **26.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে ষড্বিংশং দশকং সমাপ্তম্॥